केवल अभ्यास हेतु नमूना प्रश्न पत्र

हायर सेकेण्डरी परीक्षा– 2026

विषय– संस्कृत

| Total Question | Total Printed Pages | Time | Maximum Marks |
|---|---|---|---|
| 23 | 07 | घण्टात्रयम् | पूर्णाङ्काः – 80 |

निर्देशाः- 1. सर्वे प्रश्नाः समाधेयाः।
2. प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।
3. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि।
4. प्रश्नक्रमांक- 01 तः 05 पर्यन्तम् 32 वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकप्रश्नाय अङ्कमेकं (01) निर्धारितम्।
5. प्रश्नक्रमांक- 06 तः 15 पर्यन्तम् 10 प्रश्नाः सन्ति। प्रत्येकप्रश्नाय अङ्कद्वयं (02) निर्धारितम्।
6. प्रश्नक्रमांक- 16 तः 19 पर्यन्तम् 04 प्रश्नाः सन्ति। प्रत्येकप्रश्नाय अङ्कत्रयं (03) निर्धारितम्।
7. प्रश्नक्रमांक- 20 तः 23 पर्यन्तम् 04 प्रश्नाः सन्ति। प्रत्येकप्रश्नाय अङ्कचतुष्टयं (04) निर्धारितम्।

**1.** उचितं विकल्पं चित्वा लिखत - 6

(क) पूर्वरुपसन्धेः उदाहरणम् अस्ति
(i) एतान्यपि (ii) शरीरेऽत्र (iii) विद्यालयः (iv) पावकः

(ख) 'ब्राह्मणम्+च' इत्यस्य सन्धियुक्तपदम् अस्ति-
(i) ब्राह्मणश्च (ii) ब्राह्मणा च (iii) ब्राह्मणच (iv) ब्रह्मणच

(ग) 'वेदात्मा' इत्यस्मिन् पदे सन्धिः अस्ति-
(i) गुणसन्धिः (ii) अयादिसन्धिः (iii) विसर्गसन्धिः (iv) दीर्घसन्धिः

(घ) 'जगतो यत्र निबध्दं तद्विज्ञेयं पुराणम्' इत्यस्मिन् वाक्ये अव्ययपदम् अस्ति-
(i) जगतोः (ii) यत्र (iii) निबध्दं (iv) पुराणम्

(ङ) 'पुराणप्रभेद एव इतिहासः' इत्यस्मिन् वाक्ये अव्ययपदम् अस्ति-
(i) पुराण (ii) प्रभेद (iii) एव (iv) इतिहासः

(च) 'श्रुतिः द्विविधा मन्त्राः ब्राह्मणं च' इत्यस्मिन् वाक्ये अव्ययपदम् अस्ति-
(i) श्रुतिः (ii) मन्त्राः (iii) ब्राह्मणं (iv) च


Visit CollegeDekho

**2.** प्रदत्तशब्दै: रिक्तस्थानपूर्तिं कुरुत- 6

(क) 'आसीत्' इत्यस्मिन् पदे..............लकारः अस्ति। (लङ्/लट्)

(ख) 'त्यजन्ति' इत्यस्मिन् पदे ……………… अस्ति। (द्विवचनम्/बहुवचनम्)

(ग) 'भवति' इत्यस्मिन् पदे ……………… धातु: अस्ति। (भू/गम्)

(घ) 'वसन्ति' इत्यस्मिन् पदे ……………… पुरुष: अस्ति। (प्रथम/उत्तम)

(ङ) 'संविदा' पदस्य....................पर्यायपदं भवति। (सद्भावना/दुर्भावना)

(च) 'निशीथे' पदस्य....................पर्यायपदं भवति। (रात्रौ/जलम्)

**3.** शुद्धवाक्यानां समक्षम् 'आम्" अशुद्धवाक्यानां समक्षम् 'न' इति लिखत - 6

(क) 'अनुशासनम्' इत्यस्मिन् पदे 'अनु' उपसर्ग: अस्ति।

(ख) 'आगत्य' इत्यस्मिन् पदे 'गत्' उपसर्ग: अस्ति।

(ग) 'वि' उपसर्गयुक्तपदम् 'विधाय' अस्ति।

(घ) 'कर्त्तुम्' इत्यस्मिन् पदे 'ल्यप्' प्रत्यय: अस्ति।

(ङ) 'स्थली' इत्यस्मिन् पदे 'ङीष्' प्रत्यय: अस्ति।

(च) 'क्त्वा' प्रत्ययस्य उदाहरणं 'श्रुत्वा' अस्ति।

**4**. युग्ममेलनं कुरुत्- 7

| अ | आ |
|---|---|
| (क) प्रतापदुर्गदौवारिक: | (i) चपलताम् |
| (ख) न ज्ञानम् | (ii) पञ्चमीविभक्तिः |
| *(ग)* लूक्षा | (iii) सप्तमीविभक्तिः |
| (घ) मौनम् | (iv) द्विगुसमास: |
| (ङ) त्रिविधम् | (v) तत्पुरुषसमास: |
| (च) अधिकरण-कारके | (vi) अलूक्षा |
| (छ) अपादान-कारके | (vii) अज्ञानम् |

**5**. एकवाक्येन उत्तरत - 7

(क) क: मातु: परिवादं श्रोतुं न इच्छति ?

(ख) दौवारिकस्य निष्ठा केन परिक्षिता ?

(ग) केन कुलं विभाति ?

(घ) "राजेन्दु: दिलीप:" इत्यत्र विशेष्यपदं किमस्ति ?

(ङ) "सुशोचि: शाटी" इत्यत्र विशेषणपदं किम् ?

(च) "शतधा अस्त्रधारा" इत्यत्र विशेष्यपदं किम् ?

(छ) "शत्रुजित: ऋतुध्वज:" इत्यत्र विशेषणपदं किम् ?



Visit CollegeDekho

**6.** शिष्य: किं कृत्वा प्रजातन्तुं न व्यवच्छिन्द्यात्? 2

**अथवा**

ब्राह्मणा: कीदृशा: स्यु:?

**7.** दौवारिकस्य निष्ठा अयं पाठ: कस्मात् ग्रन्थात् गृहीत:? 2

**अथवा**

रात्रौ के के प्रविशन्ति?

**8.** महाकविकालिदासेन वैवस्वतो मनु: महीक्षितां कीदृश: निगदित:? 2

**अथवा**

रवि: रसं किमर्थम् आदत्ते?

**9.** रामेण त्रीणि पातकानि कानि उक्तानि? 2

**अथवा**

राम: लक्ष्मणस्य रोषं कथं प्रतिपादयति?

**10.** केन कुलं विभाति ? 2

अथवा

भोजनान्ते किं विषम् ?

**11.** प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य-पुस्तकात् सुभाषितमेकं श्लोकं लिखत। 2

**12.** रेखांकितपदानि- आधृत्य प्रश्ननिर्माणं कुरुत- (कौ द्वौ) 2

(क) दुर्गाध्यक्ष: एव यथोचितं व्यवहरिष्यति।

(ख) दीपस्य समीपमागत्य सन्यासिना उक्तम्।

(ग) संन्यासी तुरीयाश्रमसेवी इति प्रणम्यते।

**13.** अधोलिखितेषु संवादेषु कः कं प्रति कथयति इति लिखत- (कौ द्वौ) 2

(क) न शक्नोमि रोषं धारयितुम्।

(ख) एनामुद्दिश्य देवतानां प्रणामः क्रियते।

(ग) यत्कृते महति क्लेशे राज्ये मे न मनोरथ:।



Visit CollegeDekho

**14.** ‘हितोपदेश:’ कस्य रचना ? कति परिच्छेदा: च सन्ति ? 2

**अथवा**

पञ्चतन्त्रस्य लेखक: क: ? कति तन्त्रा: च सन्ति ?

**15.** ‘मेघदूतम्’ कस्य रचना ? कति सर्गा: च ? 2

**अथवा**

‘किरातार्जुनीयम्’ कस्य रचना अस्ति ? कति सर्गा: च सन्ति ?

**16.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत- 3

शोकसन्तप्तो मुञ्जः प्रायश्चित्तं कर्तुं आत्मनो वह्नौ प्रवेशनं निश्चितवान्। राज्ञः वह्निप्रवेशकार्यक्रमं श्रुत्वा वत्सराजः बुद्धिसागरं नत्वा शनैः शनैः प्राह-तात ! मया भोजराजो रक्षित एवास्ति। पुनः बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराजः ततो निष्क्रान्तः। पुनः राज्ञो वह्निप्रवेशकाले कश्चन कापालिकः सभां समागतः। सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्जः प्रावोचद्- हे योगीन्द्र! महापापिना मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति।

**प्रश्नाः-**

क. शोकसन्तप्तो मुञ्जः कुत्र प्रवेशनं निश्चितवान्?

ख. राज्ञो वह्निप्रवेशकाले क: सभां समागतः?

ग. महापापिना मया हतस्य कस्य प्राणदानेन मां रक्षेति?

**अथवा**

अथ कापालिकस्तं प्रावोचद्-राजन् ! मा भैषीः। शिवप्रसादेन स जीवितो भविष्यति। तदा श्मशानभूमौ कापालिकस्य योजनानुसारं भोजः तत्र समानीतः। 'योगिना भोजो जीवितः' इति कथा लोकेषु प्रसृता। पुनः गजेन्द्रारूढो भोजो राजभवनमगात्। सन्तुष्टो राजा मुञ्जः भोजं निजसिंहासने निवेश्य निजपट्टराज्ञीभिश्च सह तपोवनभूमिं गत्वा परं तपस्तेपे। भोजश्चापि चिरं प्रजाः पालितवान्।

**प्रश्नाः-**

क. केन भोज: जीवितो भविष्यति?

ख. 'योगिना भोजो जीवितः' इति का लोकेषु प्रसृता?

ग. राजा मुञ्जः निजपट्टराज्ञीभि: सह कुत्र गत्वा परं तपस्तेपे?

**17.** अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत- 3

प्राची यदा हसति हे प्रिय! मन्दमन्दं
वायुर्यदा वहति नन्दनजं मरन्दम् ।
या प्रत्यहं किल तदा मतिमाननीयां
शोभां दधात्युषसि काञ्चनकाञ्चनीयाम् ॥



Visit CollegeDekho

**प्रश्नाः-**

क. प्राची कथं हसति?

ख. उषसि काञ्चनकाञ्चनीयां कां दधाति?

ग. वायुः कथं वहति?

**अथवा**

सैषा स्थली चकित-चेतकचङ्क्रमाणां
सैषा स्थली कुटिलकुन्तपराक्रमाणाम् ।
सैषा स्थली प्रियतमाऽप्यसुतोऽमराणां
सैषा स्थली भयकरी नर-पामराणाम् ॥

**प्रश्नाः-**

क. सैषा स्थली कीदृशं चङ्क्रमाणाम्?

ख. कुटिलकुन्तः केषां सैषा स्थली?

ग. सैषा स्थली प्रियतमाऽप्यसुतः केषाम्?

**18.** अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत- 3

मदालसा- (विहस्य) यदि त्वं शीघ्रमेव पतिगृहं गमिष्यसि तदा एकाकिनी भविष्यामि, परं एकः उपायः अपि चिन्तितः मया।

कुण्डला- कः उपायः?

मदालसा- सङ्गीतसाहित्यमाध्यमेन ब्रह्मविद्यां सरसां विधाय बहुभ्यः शिशुभ्यः शिक्षणं प्रदास्यामि।

कुण्डला- गृहस्थाश्रमं प्रविश्य स्वशिशूनां चरित्रनिर्माणं मातुरराधीनम्। तत्र का विचारणा?

मदालसा- यथाहं पश्यामि पुरुषः भार्यायां स्वाधिपत्यं स्थापयति। द्रौपदीं स्वीयां सम्पत्तिं मन्यमानः युधिष्ठिरः तां द्यूते हारितवान्, यथा सा निर्जीवं वस्तु आसीत्।

प्रश्नाः-

क. त्वं कथमेव पतिगृहं गमिष्यसि?

ख. केषां चरित्रनिर्माणं मातुरराधीनम्?

ग. युधिष्ठिरः कां द्यूते हारितवान्?

**अथवा**

कुण्डला- कटुसत्यं खल्वेतत्। परं सखि ! अस्मिन् संसारे विभिन्नप्रकृतिकाः पुरुषा वसन्ति। स्वप्रकृत्यनुकूलः वरः अपि प्राप्यते। त्वं तु नवनवोन्मेषशालिन्या प्रतिभया विहितैः नूतनैः प्रयोगैः अस्मान् सर्वान् विस्मापयसि। गृहस्थाश्रमोऽपि एका प्रयोगशाला, यस्यां त्वं स्वज्ञानविज्ञानयोः प्रयोगं कर्तुं शक्ष्यसि।



Visit CollegeDekho

मदालसा- कुण्डले ! दुर्लभो जनः ईदृशः, यः गृहस्थप्रयोगशालायां स्वपत्न्यै स्वतन्त्वतां दद्यात्।

ऋतध्वजः- (स्वगतम्) अवसरोऽयमात्मानं प्रकाशयितुम्। (प्रकाशम्) उपस्थितोऽहं शत्रुजितः पुत्रः ऋतध्वजः। आज्ञा चेत् अहमपि अस्यां परिचर्चायां सम्मिलितो भवेयम्।

कुण्डला- स्वागतम् अतिथये। अपि श्रुताः भवद्भिः मम सखीविचाराः?

प्रश्नाः-

क. अस्मिन् संसारे विभिन्नप्रकृतिकाः के वसन्ति?

ख. गृहस्थाश्रमोऽपि एका का?

ग. शत्रुजितस्य पुत्रः कः?

**19.** रिक्तस्थानानि पूरयत- (केऽपि त्रयः) 3

क. परित्रायताम् परित्रायताम्............................।

ख. सत्यं......................................... धर्मं चर ।

ग. एकेनापि ...................... विद्यायुक्तेन साधुना ।

घ. एषा................... ।

ङ. .............वेदाः।

**20.** अधोलिखितं अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत- (केऽपि चत्वारः) 4

वने विक्रमादित्यः कठिनां तपस्याम् आरब्धवान्। विक्रमादित्यस्य समीपे एव एकः महात्मा अपि तपस्यारतः आसीत्। महात्मा तम् अवदत्, "राजन्! भवान् तु यथानीतिः राजधर्मस्य पालनं करोतु। धर्मानुकूलं शासनम् अपि धर्म एव भवति" इति स महात्मा विक्रमादित्यम् उपदिष्टवान्। विक्रमः अवदत् "नहि महात्मन्! तपसा एव परलोकः साध्यते, कर्मणा नेति"। महात्मा अवदत्, "राजन! राज्ञः धर्मः प्रजापालनं, शासनम् एव अस्ति तपस्या तु महात्मनां कर्म इति"। इत्युक्त्वा महात्मा राजानं पृष्टवान् कर्म-तपस्ययोः कः भेदः?

राजा अवदत् कर्मणः स्थानं भिन्नं परं तपस्या स्वर्गप्राप्तेः साधनम्। एतच्छ्रुत्वा महात्मा हसन् अवदत्- "राजन् ! मनुष्यः उत्तमानि कर्माणि कृत्वा अपि परलोकं साधयितुं शक्नोति"। अनन्तरं महात्मा योगबलेन तत्रैव यमलोकस्य दृश्यं विक्रमं दर्शितवान्। दृश्ये यमराजः दूतान् पृच्छति "एतस्य कर्म कीदृशम्?" एकः दूतः अवदत्- कर्मणां लेखनं तु चित्रगुप्तस्य पार्श्वे अस्ति।

**प्रश्नाः-**

क. कः कठिनां तपस्याम् आरब्धवान्?

ख. राजन्! यथानीतिः कस्य पालनं करोतु?

ग. "धर्मानुकूलं शासनम् अपि धर्म एव भवति" इति महात्मा कम् उपदिष्टवान्?

घ. तपसा एव कः साध्यते?

ङ. तपस्या कस्य प्राप्तेः साधनम्।

च. महात्मा योगबलेन कस्य दृश्यं विक्रमं दर्शितवान्।



Visit CollegeDekho

**21.** भवान् शुभांशः। रुग्णतायाः कारणात् दिनत्रयस्य अवकाशार्थं स्वप्राचार्यं प्रति आवेदनपत्रं लिखत। 4

**अथवा**

स्वभगिन्याः विवाहे आमन्त्रयितुं स्वमित्रं प्रति एकं पत्रं संस्कृते लिखत।

**22.** प्रदत्तैः शब्दैः अनुच्छेदलेखनं कुरुत- 4

**(प्राप्तुं समर्थः, धनमैश्वर्य, आत्माभिमानी, अतिलोलुपः, कथयति, अल्पमपि,भविष्यति, स्वमनोरथं)**

श्रीकृष्णः .........यत् मूढः अज्ञानविमोहितः जनः ............ भवति, किञ्चिद् ............प्राप्य ............ भवति यत् अद्य मया इदं प्राप्तम् अतः अहम् अन्यम् अपि............ शीघ्रमेव ............ किञ्चिद् ममास्ति तत्तु मम अस्त्येव परमन्यत् सर्व ......... मम एव .........।

**अथवा**

**(नोद्घाटयेत्, लोभश्च, आत्मनः, वर्णयन्, पिहितानि, बोधयति, द्वाररूपाणि,अर्जुनस्य)**

कर्तव्याकर्तव्यं ............ भगवान् श्रीकृष्णः ............माध्यमेन अस्मान् सर्वान् ............ यत् कामः, क्रोधः, ......... एतानि त्रीणि नरकस्य ............अतः यः जनः......... नाशं नेच्छति अपि तु स्वकीयं कल्याणमिच्छति सः एतानि द्वाराणि ........... सर्वप्रयत्नैः च एतेषां त्रयाणां त्यागं कुर्यात् येनैतानि त्रीणि द्वाराणि सदैव तस्य कृते ......... तिष्ठेयुः सः च उन्नतिपथे अग्रसरो भवेत्।

**23.** अधोलिखितेषु कविषु एकस्य कवेः परिचयं संस्कृतभाषायां लिखत- (शत-शब्देषु) 4

क. महाकविः माघः

ख. महाकविः भासः

ग. महाकविः बाणभट्टः

घ. महाकविः भवभूतिः

----xxx----



Visit CollegeDekho